# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - आचार्य-२ ( Sem_4 )** **प्रश्नपत्र-५** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CE 1.4.4 **समयः - ०३:०० तः ०६:००**

**दिनाङ्कः** - 22/04/2016 **सन्दर्भग्रन्थः - विष्णुपुराणस्य ४-६ अंशाः**

---

**युनिट-१**

**प्रश्न-१ निम्नलिखितेषु द्वयोः ससन्दर्भं व्याख्या विधेया ।** **०८**

१. मनोरथानां न समाप्तिरस्ति वर्षाद्युतेनापि तथाब्दलक्षैः ।
पुर्णेषु पूर्णेषु मनोरथानाम् उत्पत्तयः सन्ति पुनर्नवानाम् ॥

२. सुतात्मजैस्तत्तनयैश्च भूयो भूयश्च तेषां च परिग्रहेण ।
विस्तारमेष्यत्यतिदुःखहेतुः परिग्रहो वै ममताभिधानः ॥

३. न जातुकामः कामानामुपभगेन शाम्यति ।
हविषा कृष्णवर्त्मैव भूय एवाभिवर्धते ॥

**प्रश्न-२ कस्यचिदेकस्य सविस्तरं वर्णनं क्रियताम् ।** **०८**

१. वैवस्वतमनोः वेशवर्णनं क्रियताम् ।

२. सौभरिचरितं यथाग्रन्थं वर्ण्यताम् ।

**प्रश्न-३ ( अ ) एका टिप्पणी लेख्या ।** **०२**

१. ययातिचरितम् ।

२. शिशुपालस्य पूर्वजन्म ।

**( ब ) द्वयोः लघूत्तराणि लिखन्तु ।** **०२**

१. अम्बरीषः कस्य युग आसीत्?

२. कस्य शापात् ययातिः जरामवाप?

३. भगवान् सूर्यः कं मणिं कस्मै दत्तवान्?

**युनिट-२**

**प्रश्न-४ द्वयोः ससन्दर्भं व्याख्यानं विधीयताम् ।** **०८**

१. यदा चन्द्रश्च सूर्यश्च तथा तिस्रो बृहस्पतिः । एकराशौ समेष्यन्ति तदा भवति वै कृतम् ॥

२. यामेतां वहसे मूढ सह भर्गा रथे स्थिताम् । अस्यास्तवाष्टमो गर्भः प्राणानपहरिष्यति ॥

३. दिवसः को विना सूर्य विना चन्द्रेण का निशा । विना वृषेण का गावो विना कृष्णेन को व्रजः ॥

**प्रश्न-५ कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम् ।** **०५**

१. भविष्ये भविष्यतां राज्ञां वर्णनं वर्ण्यताम् ।

२. पूतनावधप्रसङ्गं यथाग्रन्थं वर्ण्यताम् ।

**प्रश्न-६** **एका टिप्पणी लेख्या।** **०२**

१. देवकृता देवकीस्तुतिः।

२. शरद्वर्णनम्।

## युनिट-३

**प्रश्न-७** **द्वयोः ससन्दर्भं व्याख्यानं विधीयताम्।** **०८**

१. दुःखान्येव सुखानीति मृगतृष्णा जलाशया। भया नाथ गृहीतानि तानि तापाय मेऽभवन्॥

२. यदि वोऽस्ति मयि प्रीतिः श्लाध्योऽहं भवतां यदि। तदात्मबन्धुसदृशी बुद्धिर्वः क्रियतां मयि॥

३. भूतात्मा चन्द्रिकात्मा च प्रधानात्मा तथा भवान्। आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः॥

**प्रश्न-८** **कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम्।** **०५**

१. श्रीकृष्णस्य मथुराप्रायमे गोपगोपीनां मनोदशा यथाग्रन्थं वर्ण्यताम्।

२. वृषभासुरवधप्रसङ्गः ग्रन्थानुसारं लिख्यताम्।

**प्रश्न-९** **एका टिप्पणी लेख्या।** **०२**

१. मुचुकुन्दकृता भगवत्स्तुतिः।

२. अक्रुरस्य गोकुलयात्रा।

## युनिट-४

**प्रश्न-१०** **कयोश्चित् द्वयोः ससन्दर्भं व्याख्यनं विधीयताम्।** **०८**

१. अहं ममेति भावो यत्प्रायेणैवोपजायते। संसारमातुमयियास्तवैवन्नाथ वेष्टितम्॥

२. अविद्यामोहितात्मानः पुरुषाः भिन्नदर्शिनः। दवन्ति भेदं पश्यन्ति चावयोरन्तरं हर॥

३. अलं ते पीड्ययार्थ न त्वं शोचिमुमर्हसि। अवेहि सर्वभूतेषु कालस्य गतिरीदृशी॥

**प्रश्न-११** **कस्याप्येकस्योत्तरं सविस्तरं लिखत।** **०८**

१. उषाचरितं यथाग्रन्थं विवेचयन्तु।

२. आध्यात्मिकादि त्रिविधतापवर्णनं कुर्वन्तु।

**प्रश्न-१२** **निम्नाङ्कितेषु चतुर्णामेकवाक्येनोत्तराणि यच्छन्तु।** **०४**

१. सत्यभामा कस्य राज्ञः पुत्री आसीत्?

२. कः दैत्यः इन्द्रस्य मातुः कुण्डले जहार?

३. रुक्मिण्याः के के पुत्राः बभूवुः?

४. श्रीकृष्णः कस्य भुजसहस्रं विदारयामास?

५. जाम्बतीनंदनः साम्बः कस्या हरणं कृतवान्?

६. यादवकुलं केषां शापात् विनाशं प्राप?